## रीङ् ऋतः। (२७/१२३४)

ऋकारान्तस्य अङ्गस्य अकृद्यकारे असार्वधातुके यकारे च्वौ च परतो रीङ इत्ययमादेशो भवति। मात्रीयति। मात्रीयते। [1]पित्रीयति। पित्रीयते। चेक्रीयते। मात्रीभूतः। क्ङिति इत्येतन्निवृत्तम्, तेनेहापि भवति, पितुरागतं पित्र्यम्। ऋत इति तपरकरणं किम्? चेकीर्यते। निजेगिल्यते॥

## रिङ् शयग्लिङ्क्षु। (२८/२३६७)

ऋकारान्तस्याङ्गस्य श यक् इत्येतयोः लिङि च यकारादौ असार्वधातुके परतो रिङ् इत्ययमादेशो भवति[2]। श – आद्रियते। आध्रियते। यक् – क्रियते। ह्रियते। लिङ – क्रियात्[3]। [4]ह्रियात्। रिङवचनं दीर्घनिवृत्त्यर्थम्। असार्वधातुके इत्येव, बिभृयात्। यि इत्येव, कृषीष्ट। हृषीष्ट॥

## गुणोऽर्तिसंयोगाद्योः। (२९/२३८०)

ऋतः यकि लिङि इति वर्तते। श इत्यसम्भवात् निवृत्तम्। गुणो भवति अर्तेः संयोगादीनाम् ऋकारान्तानां[5] यकि परतो लिङि च यकारादौ असार्वधातुके। अर्यते। अर्यात्। [6]स्मर्यते। स्मर्यात्। इह संस्क्रियते, संस्क्रियात् इति सुटो बहिरङ्गलक्षणस्य असिद्धत्वात् अभक्तत्वात् वा संयोगादित्वम् अङ्गस्य नास्ति इति गुणो न प्रवर्तते। यि इत्येव, स्वृषीष्ट। ध्वृषीष्ट। असार्वधातुके इत्येव, इयृयात्॥

## यङि च। (३०/२६३३)

यङि च परतः अर्तेः संयोगादेश्च ऋतः गुणो भवति। अरार्यते। सास्वर्यते। दाध्वर्यते। सास्मर्यते। अर्तेः 'अटचर्त्यशूर्णोतीनामुपसंख्यानम्' (७.४.८२/२६३० वा.) इति यङ। 'न न्द्राः संयोगादयः' (६.१.३/२४४६) इति द्विर्वचनप्रतिषेधः यकारस्य नेष्यते।

[८७१] हन्तेर्हिंसायां यङि घ्नीभावो वक्तव्यः। (म.भा. ३.३४९)

जेघ्नीयते। हिंसायाम् इति किम्? जङ्घन्यते॥

## ई घ्राध्मोः। (३१/२६४८)

घ्रा ध्मा इत्येतयोः यङि परतः ईकारादेशो भवति। जेघ्रीयते। देध्मीयते॥

---

1. पित्रीयति नास्ति इ. ह. 2. लिङ्विशेषणार्थं असार्वधातुकग्रहणम् इहानुवर्तते इत्यधिकम् ब. 3. क्रियास्तां क्रियासुः इत्यधिकम् ह. 4. नास्ति ह. 5. च अङ्गानाम् इत्यधिकम् इ. 6. ध्वर्यते ध्वर्यात् ह.